# Panduranga Stotram 5

# પાણ્ડુરઙ્ગસ્તોત્રમ્ ૫

## Document Information

Text title : Panduranga Stotram 5

File name : pANDurangastotram5.itx

Category : vishhnu, vishnu, moropanta, stotra

Location : doc_vishhnu

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 23, 2023

*sanskritdocuments.org*

# પાણ્ડુરઙ્ગસ્તોત્રમ્ ૫

(પઞ્ચમમ્)

(સ્રગ્વિણીવૃત્તમ્)

સખ્યમાપુર્યયા બાલગોપા વને ભીમરથ્યાસ્તટે સત્યતઃ(૧) પાવને ।
સાધિતા પુણ્ડરીકેણ યા સાધુના સિદ્ધિરાલિઙ્ગ્યતે(૨) સજ્જનૈઃ સાઽધુના ॥ ૧॥

ક્વાપિ(૩) કસ્માદપીષન્નદાસાદરં યાન્ત્વિતિ ત્યક્તનિદ્રં સદાસાદરં ।
તિષ્ઠતે યા કલૌ સાનુકમ્પાઽવનૌ શ્યામલાહં તદઙ્ઘી ભજે પાવનૌ ॥ ૨॥

વિઠ્ઠલાખ્યા ભવાબ્ધૌ તરિઃ(૪) પારદા યાં શ્રિતા (૫)વજ્રવેદેન્દુભૃન્નારદાઃ ।
સ્થાપયામાસ સદ્ધાર્મિકઃ કોઽપિ તાં ચેતસૈવાશ્રયે સાધુભિર્ગોપિતામ્ ॥ ૩॥

પાણિપદ્મદ્વયન્યાસરાજત્કટિં શ્યામલાં કોમલાં પીતવિદ્યુત્પટીં ।
સાધુભિર્નૃત્યમાનામુદારાં નટીં સમ્પિબામોદ્ભુતાઙ્ગીં સુધાયા ઘટીમ્ ॥ ૪॥

ગાઢમાલિઙ્ગ્યતે યા સદા પાપિભી રમ્યરૂપા યયા નેક્ષ્યતે કાપિ ભીઃ ।
સ્વૈર્ગુણૈર્મુગ્ધગીતૈઃ સદા મોહિતાં તાં વિશઙ્કું સ્વમાતુર્વદામો હિતામ્ ॥ ૫॥

મય્યપત્યે સ્વકર્માલસેઽલં ક્રુધા ચિન્તયા સાધુભિસ્તામ્યતે કીં મુધા ।
ભીમરથ્યાસ્તટે (૬)સ્વર્ગ્યલભ્યા બુધા ભો મયા પીયતે સાધુલબ્ધા સુધા ॥ ૬॥

તાપપાપૌષધં સાધુ યન્નામ યા સન્મુખાચ્ચ શ્રુતા સુપ્રસન્નાભયા(૭)
બલ્લવીનાં સખીં દેવતાદેવતાં ચિન્તયે (૮)ચિત્તમેત્યુસ્સવાદેવ તામ્ ॥ ૭॥

ત્યક્તસિંહાસનાઃ સાધવઃ કેવલં પ્રાપ્તુકામા હિ યત્પાદપાંસું દરીં ।
ઈયુરેવોત્સુકાઃ કો ન તો ચિન્તયેન્નિર્જિતસ્વર્ગસત્પાદપાં સુન્દરીમ્ ॥ ૮॥

કો ન તાં ચિન્તયેચ્છુદ્ધિકામઃ કલૌ (૯)યત્પદામ્ભોજનિર્ણેજનાપાં તતિઃ ।
સાધુનીરાજિતા (૧૦)સાધુનીરાઽજિતા સા ધુની રાજિતા શમ્ભુમૌલાવપિ ॥ ૯॥

સિદ્ધિરત્યુત્તમા યોગ્યલભ્યાઽસતસ્ત્રાસદેવાવરાન્નિત્યમભ્યાસતઃ ।
પુણ્ડરીકેણ યા સાધુનીરાઽજિતા(૧૧) ભક્તવૃન્દૈઃ કલૌ સાધુનારં જિતા ॥ ૧૦॥

જીવનેનાપ્યહોધીષ્ટકં(૧૨) તર્પિતો ભીમરથ્યાસ્તટે પુણ્ડરીકેણ યઃ ।
શ્યામલઃ કોઽપિ દીપઃ પતઙ્ગપ્રિયઃ(૧૩) શ્રિષ્યતાં તાપહા નિર્મલઃ સ્નેહકૃત્ ॥ ૧૧॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં પાણ્ડુરઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ।

ટિપ્પણિ

* અસ્ય કવિલિખિતા માતૃકોપલભ્યતે । કિન્તુ તસ્યાં સમાપ્તિદ્યોતકો લેખો ન દૃશ્યતે ન વાત્રૈવેતત્સમાપ્તમિતિ પરિજ્ઞાતું પાર્યતે । ઇદં તુ નામધેયમસ્માભિઃ પ્રકરણાર્થમનુસૃત્યૈવ વિહિતમિત્યવધેયં સહૃદયૈઃ ।

૧। સત્યતઃ સત્યલોકાદપિ ।

૨। સિદ્ધિઃ શ્રીવિઠ્ઠલરૂપા ।

૩। ઈષદપિ દાસાદ્ અરં દ્રુતં ક્વચિદપિ મા યાત્વિતીવ યાઽવનૌ તિષ્ઠતે તદઙ્ઘ્રી અહં ભજે ઇત્યન્વયઃ । “યાન્ત્વિતિ” ઇતિ તુ બહુવચન પ્રામાદિકમ્ । “તિષ્ઠતે” ઇત્યાત્મનેપદમપાણિનીયમ્ ।

૪। તરિર્નૌઃ ।

૫। વજ્રભૃદિન્દ્રઃ, વેદભૃદ બ્રહ્મા, ઇન્દુભૃત્ શઙ્કરઃ ।

૬। સ્વર્ગિણો દેવાસ્તેષામલભ્યા ।

૭। અવિદ્યમાનં ભયં યસ્યાઃ સા અભયા ।

૮। ચિત્તં તામુત્સવાદેવૈતિ ઇત્યન્વયઃ ।

૯। યસ્ય પદામ્ભોજયોર્નિર્ણેજનં ક્ષાલનં તદર્થમુપયુક્તાનામપાં તતિઃ સાધુભિનીરાજિતા સ્તુતા ।

૧૦। સાધુનીરા અજિતા સા ધુની ભીમરથી શમ્ભુમૌલાવપિ રાજિતા ઇત્યન્વયઃ ।

૧૧। આદરાન્નિત્યમભ્યાસતઃ સતતમુપસેવનયા અસતો ભાવયતીતિ તાદૃશીતિ કથઞ્ચિદ્યોજનીયમ્ ।

૧૨। અધીષ્ટકમિષ્ટકાયામ્ ।

૧૩। પતઙ્ગસ્ય વૈનતેયસ્ય પ્રિયઃ ।

Proofread by Rajesh Thyagarajan

*Panduranga Stotram 5*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*